केरळविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः – २१८

नीलकण्ठसन्देशः

प्रकाशकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने एस्. वी. जी. मुद्रणाळये मुद्रितम् ।

१९६६/११४१

मूल्यं रूप्यकमेकम् ।

INTRODUCTION

Meghasandeśa of Kalidasa has inspired several Sandeśakāvyas in Kerala as also in other parts of the country. One major work among these is the Śukasandeśa of Lakṣmīdāsa[1]. Following Śukasandeśa, several Sandeśakavyas were composed by Kerala authors and several of them have been published in the Trivandrum Sanskrit Series[2]. Though these works are not of great literary merit, they are noteworthy because of the geographical, historical and cultural information they give about Kerala. The *Nīlakaṇṭhasandeśa* which we are now publishing as No 218 of the Trivandrum Sanskrit Series is one of these less important Sandeśakāvyas It originally appeared in the pages of the Sanskrit Journal of the Kerala University Manuscripts Library[3].

The author of the work is Śrīdharan Nambi of

---

1. *Śukasandeśa text - published by Anantanārāyaṇa Śāstri Mangalodayam Co. Ltd.*

2. *Kokasandeśa by Viṣṇutrāta - T. S. S. No. 125*
Bhṛṅgasandeśa by Vāsudeva - T. S. S. No. 128
Hamsasandeśa by Pūrṇasarasvatī - T. S. S. No. 129
Sandeśacatuṣṭayam - T. S. S. Nos. 204 - 208
(Kāmasandeśa, Hamsasandeśa Cakorasandeśa and Mārutasandeśa)

3. *Vol. XIII No 2 pp. 3 - 28*

Punnaśśeri (Punnāgaśśeri is the Sanskritised form) at Paṭṭāmbi in North Kerala, who was born in 1774 A. D. and died in 1830[4] A. D. His grandson Nārāyaṇa has written a commentary called Nārayaṇīya on another work of Sridhara, named the Vikramādityacarita[5]. Nārāyaṇa's son was the great scholar Punnaśśeri Nīlakaṇṭha Śarma, who founded the Sanskrit College at Paṭṭāmbi. The members of the Punnaśśeri family were the ministers of the Zamorins, the Kings of Calicut, and managed the affairs of the Erāḷppādu, the heir-apparent of the Zamorin and the present author too enjoyed these privileges[6]. He studied under Bharata Piṣāroṭi[7] and became

---

4. *See - Dr. K. Kuñjuṇṇi Rāja - Contribution of Kerala to Sanskrit Literature - p. 236 and also Uḷḷūr S. Parameśvara Iyer - Keraḷasāhityacaritram - Vol- III p. 492.*

5. *See - the reference* काव्यकर्तुश्च पौत्रेण *in the colophon of the commentary on Vikramādityacarita - quoted from K. S. C. Vol. III p. 492.*

6. *See - P. Govinda Pillai - Bhāṣācaritram - N. B. S. Edition, 1956 - p. 408 - cf. also the following verse of Vikramādityacarita -*

पुन्नश्शेरीति कश्चित् परहिति निहितात्मा शिवब्राह्मणो यः
शैलाब्धीशस्य मन्त्री तदुपरि युवराजस्य यो मुख्यमन्त्री ।
मूकाम्बानुग्रहात्तत्पुरुषविरचिते विक्रमादित्यवृत्ते
काव्येऽस्मिन् चारुभङ्ग्या निरगमदधुना पञ्चमो ह्यन्त्यसर्गः ॥

7. *cf. the statement in Vikramādityacarita -* साक्षात्सम्प्राप्तविद्यो भरतगुरुमुखात् *etc.*

a well - known astrologer[8].

Śrīdharan Nambi worshipped the Goddess at Īṅṅayūr or Īhāpura, the Goddess of Rāyiranallūr or Rājarājālayam and Śiva at the temple of Tirumāṇiyūr or Mānigeha which are his family deities. He was also a devotee of the Goddess at Mūkāmbi. These are all known from his Vikramādityacarita[9]. The date of the completion of the work is given by the 'Kali' chronogram 'शब्दप्रज्ञानदीपे' representing the 16th instant of Makaram 1003 - K. E. given in the work itself[10]

Srīdhara has also composed Bhāgavatam Ekādaśa Skandha in Kiḷippāṭṭu style in Malayalam. This work did not become popular perhaps because it lacked

---

8. *See - Uḷḷūr S. P. Iyer - K. S. C. Vol. III p. 492.*

9. *cf: the following lines of Vikramādityacarita quoted from K. S. C. Vol. III p. 492 -*

1) साक्षादीहापुरोद्भासितसकलजगन्मातृपादाब्जभक्तः ।।

2) साक्षाच्छ्रीमानिगेहाधिपपुरहरपादाब्जजातैकभक्तिः ।

3) यत्पादपद्माश्रयलब्धबुध्यै-
वैतत्तु काव्यं रचितं मयाद्य ।
मूकाम्बिकां तां प्रणिपत्य ताव-
द्विरम्यते साम्बसदाशिवेति ।

10. 'शब्दप्रज्ञानदीपे' कलियुगसमये हन्त मूकाम्बिकायाः
पादाम्भोजातयुग्मे समधिगतमहद्भक्तिपूर्वं प्रणम्य ।
तत्कारुण्याप्तबुध्या रचितमिह मया विक्रमादित्यवृत्तं
नामैतच्चारुकाव्यं भवतु च विदुषाम् ऋणवतां मङ्गलाय ॥

in literary merit. P. Govinda Pillai says[11] that besides Nīlakaṇṭhasandeśa, Vikramādityacarita and the above-mentioned 'Kiḷippāṭṭu', the author has written the following works also–

1. Paridevanaśataka,
2. Bhāgavatasamgraha,
3. Mauḍhyagaṇita, and
4. Aṣṭakāvali.

P. Govinda Pillai also gives the information that Punnaśśeri Nilakaṇṭha Sarma has written a commentary called 'Sadarthabodhini' on the Nīlakaṇṭhasandeśa[12].

Nīlakaṇṭhasandeśa is a short poem of 126 verses describing the despatch of a message of love from Īṅṅayūr (Īhāpura is the sanskritised form) to Çerppuḷḷaśśeri[13] (Śreṇikā), through a peacock. The poem begins with the statement that a lover separated from his beloved, resides alone in his hermitage in Īhākṣetra at the northern bank of the river Nilā or Bhāratappuzḷa.

कश्चित्कान्ताविरहविधुरः स्वाश्रमे निस्सहाय-
स्तद्वक्त्राम्भोरुहमपि सदा भावयन्नन्तरङ्गे ।
ईहाक्षेत्रे किमपि च निलामुत्तरेणैव कामी
चक्रे वासं भुवनजननीनित्यसान्निध्यपूर्णे ॥

11. *Bhāṣācaritram*, p. 408
12, do. p, 487.
13. *See for reference to the place - Malabar Gazeteer - published by K. C. Manavikraman Raja - Part IV. p. 236*

From there, the hero sends a message to his beloved through a Nīlakaṇṭha or a peacock whom he happens to meet there. The peacock is asked to go to a house near 'Ayyappankāvu' temple (Śaṣtākṣetra) at Cerppuḷḷaśśeri where the heroine resides.

On the way are situated noted places like Kasthali, Puṣpakroda, Marutapura on the banks of the river Vallāpaga or Vallappuzha, Śūrakrodam and Maṇiyanaṭam[14]. The poet also describes a mountain called Dvipivaktra and mentions the places Tāluśri and Nellāya and a temple of Śiva. The hero points out a Śalmali tree on the way and directs the messenger to climb to the top of the tree in order to get a vision of the sea. The author takes the occasion to describe the sea also. At the end of this description, Sreedhara mentiones the place Śreṇika or Cerppuḷḷaśśeri, the destination of the messenger. There is a Śāstākṣetra or Ayyappankāvu in Śreṇika at the northern side of which the heroine's house is situated. The poet describes the temple and the ladies who come to the temple to worship the deity. The peacock

---

14, *See* -

पुष्पक्रोडं मरुत्पुरमप्यत्र वल्लाप (गम्बे ? गाङ्के)
शूरक्रो(डा ? डं) मणियनटमित्यश्रसैतान् प्रदेशान् ।
पश्चात्कृत्वा पुनरपि सखे गच्छतस्ते पुरस्ताद्
(द्वी ? द्वी) पीवक्त्रः स्फुटतरमहो ! भासितोऽयं गिरीन्द्रः ॥ *verse-22*

These are sanskritised forms of the names of certain local places between Pattāmbi and Cerpuḷḷaśśeri.

is then directed to visit the house of the heroine and to communicate the message of the hero.

It is especially noteworthy that this Sandeśa-kāvya is not divided into two parts.[15] So also, unlike in other similar works, neither the identity of the hero and the heroine nor the circumstances in which the lover is separated from his sweetheart are mentioned in the work. The distance between the starting place and the destination is limited and so the author takes time to describe the mountain, sea temples etc. We get a historical information of a fight between the Zamorin and Hyder Ali of Mysore at the battlefield of 'Tāluśri'.[16] It

---

15. *Note thāt the division into Purva and Uttara Megha is not made in the Meghadūta critically edited by S. K. De, due to the fact that the division is somewhat arbitrary and is not found in the early commentaries on Meghaduta by Vallabhadeva and Sthiradeva nor in Jinasena's text of Meghasandesa.*

See foot - note under the stanza 63 - Meghaduta - Critical Edition - Sahitya Academy - New Delhi - 1957 - p. 59.

16: यत्रैवासीदयि ! (ति *i* त)लिबलेनाचलाम्भोधिभर्तु-
स्तीव्राघातापतितविशिखोत्कृत्तबाहूरुकण्ठम् ।
मेदोमज्जामिलितगलितोद्रिक्तरक्तप्रवाहं
हाहाकारं तुमुलमतिभीतिप्रदं (सः ? सं)प्रहारः ॥ *Verse-31*

Here अयि ! (ति ? त)लि *read as* अयितलि–
cf. Ullur S. P. Iyer, K. S. C. Vol.d III . 496.
For reference to Hyder Ali's conquest on Malabar - see K. P. Padmanabha Menon - History of Kerala Vol. I p. 266.

is interesting to note in this connection that the author refers to the journies of European couples by the vehicles available in those days[17]. The social references such as the Brahmacarin's stage[18], study of Mīmāmsa[19], gift of Brahmasva[20] etc. are also notable features.

So far as the literary value of the work is concerned, it can not be described to be of any high order. The author imitates the Meghasandeśa and the Śukasandeśa, not only in ideas but also in verbalisation.

---

17. प्रेमावेशात् पुलकितसुदृग्बाहुपाशाक्तकण्ठै-
हूंणाधीशैः सुखतरसमाधिष्ठितैराविशालैः ।
सैषा भाति ह्यपि च शिबिकागाडिहौभादिमुख्यै-
र्नानायानैर्मनुजतुरगोत्तुङ्गमातङ्गवाह्यैः ॥ *Verse-16*

18. मौञ्जीकृष्णाजिनपरिमिलद्ब्रह्मसूत्राञ्चिताङ्गा
भारद्वाजाः करधृतसमित्खण्डकुण्डीरदण्डाः ।
सर्वत्रास्मिन् श्रुतिमुखपराः सञ्चरन्ति द्विजेन्द्राः
केकाभिस्तानुपचर सखे षड्जसंवादिनीभिः ॥ *Verse-48*

19. यस्मिन् श्रीमन्नपि च गृहिणः सन्निषण्णा सशिष्या
जैमिन्युक्तीरनुदिनमहो पाठयन्तः पठन्तः ।
गच्छन्तं त्वामयि ! बत सखे सम्यगातिथ्यतो वै
सोपाध्यायाः सपदि विधिवत् पूजयेयुः प्रकामम् ॥ *Verse-49*

20. विश्राम्य(न्ते ? न्ति) क्षितिसुरवरा मोदकाप्त्यर्थमन्तः
क्षेत्रे यस्मिन् क्षुदुपशमने विस्मृतान्योन्यमैत्राः ।
लब्ध्वा भूयः क्षुदुपशमने हन्त शान्ता नमन्तो
भूताधीशं त्रिभुवनगुरुं स्व(स्व ? स्थ)चित्ताः प्रयान्ति ॥
Verse-84

A few examples may be pointed out:—

1. कश्चित्कान्ताविरहविधुरः स्वाश्रमे निस्सहायः – Nila-verse-1
कश्चित्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः – Megha-verse-1

2. जानामि त्वां परमसुहृदं कार्तिकेयस्य भूम्नः – Nila-verse-3
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः – Megha-verse-6

3. कल्याः कुल्या अमरसरितास्तुल्यकुल्याःप्रथन्ते – Nila-verse-37
तुङ्गाः शृङ्गैरपि हिमगिरेस्तुल्यकुल्या प्रथन्ते – Śuka-verse-II-4

A few stanzas may be quoted in order to illustrate the style of the poem.

1. Dance of a peacock:—

केकाघोषोत्कलितललितग्रीवतुण्डाभिराम-
व्यालीनाङ्गोद्वलितविकसच्चन्द्रकोद्यच्छिखण्डैः ।
गौरीनाथं परमपुरुषं यत्र ते लास्यघोषै-
र्लीलालोलैर्द्विजवर सखे भक्तिपूर्वं भजेथाः ॥ verse-12

2. Description of a herd of bulls:—

नानाभारोद्वहनविनमत्पृष्ठभागोन्नतांस-
ग्रीवाभङ्गाश्चितघणघणाघोषघण्टानिनादैः ।
गोत्राकारैर्वटुकवटुभिश्चोद्यमानैर्वृषौघै-
र्व्याप्यैषा सततमयि ते हन्त रथ्या विभाति ॥ verse-15

3. Description of a tree:—

लीनानेकद्विजकुलकलालापगीतानुगाय-
न्माद्यद्भृङ्गीपतनसुमनःस्यन्दिमूर्धाभिषिक्तः ।

साक्षा(देष ? देवः) पशुपतिरिति व्यक्तशङ्कापहो वै
भूयाच्छ्रीसन्नाभिनवसुमस्तोमसूर्या· मुदे वः ॥ verse-54

4. Description of Ladies:—

सालङ्काराः सुललितपदाश्चारुरूपाः सुवृत्ता·
श्चेतोरम्याः सरसमधुराश्चापि गम्भीरभावाः ।
यत्रत्या(त्ते ? त्ताः) कुवलयदृशो यद्गिरश्चानुयान्त्यः
साक्षादर्थं कविजनवचांसीव तां दर्शयेयुः ॥ verse-102

Despite the obvious imitations on Kālidāsa and Lekshmīdāsa, the work is not without some original merit as far as descriptions and literary style are concerned, as can be gathered from the passages given above. The poet, however, is not above the tendency to be careless with his language. A few grammatical inaccuracies, which can be considered forgivable in a master, are found here and there, and one wonders how they escaped the notice of the poet.

The edition is based on a manuscript (No.T.976) written in Devanagari script belonging to this Library.

I have been assisted in the publication of this work by Sri. A. Ramachandra Sastri, Research Officer, and Sri. M. Madhavan Unni, and Sri. E. Easwaran Namboodiri, Assistant Research Officers.

Trivandrum
27-1-1966.

K. Raghavan Pillai.
CURATOR.

॥ श्री ॥

नीलकण्ठसन्देशः ।

कश्चित् कान्ताविरहविधुरः स्वाश्रमे निःसहाय-
स्तद्वक्त्राम्भोरुहमपि सदा भावयन्नन्तरङ्गे ।
ईहाक्षेत्रे क्विमपि च निळामुत्तरेणैव कामी
चक्रे वासं भुवनजननीनित्यसान्निध्यपूर्णे ॥ १ ॥

अभ्यायान्तं तटिदिव(?) वियद् भासयन्तं स्वभासा
सोऽयं कामी कमपि सुभगं नीलकण्ठं ददर्श ।
यक्षेशः प्राग् जलमुचमिव प्राह तं हृष्टचेताः
सम्बुद्ध्योक्त्या (पिक?खग)वर सखे! भ्रातरित्यादरेण ॥२॥

भ्रातः श्रीमन् प्रियसख! सदा सुस्वरं चारुरूपं
जानामि त्वां परमसुहृदं कार्तिकेयस्य भूम्नः
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामे-
त्युक्तं प्राग्भिस्तदहमधुना किञ्चिदभ्यर्थये त्वाम् ॥ ३ ॥

आस्ते काचित् प्रियसख! पुरी श्रेणिकेति प्रसिद्धा
ह्येतामेत्य प्रथितयशसा वर्तते राजलोकः ।
यस्यामास्ते मम च दयिता मेनकेवाळकायां
यक्षस्येव द्विजवर सखे! विप्रयोगावखिन्ना ॥ ४ ॥

आदाय द्राङ् निरुपममिदं स्मारसारांशभूतं
गूढाकारं प्रणयपिशुनं चारु सन्देशवाक्यम् ।
एतेनान्यैस्तव(ली?च) वचनैश्चाटुकल्पैः प्रकामं
संप्राप्यैनां विरहविवशां ह्लादयाह्लादय त्वम् ॥ ५ ॥

केयं बाला तदुपशमने हन्त को वा सुमार्गः
किं वाप्येतत् प्रणयपिशुनं चारु सन्देशवाक्यम् ।
इत्थं चेतः सपदि भवतः किन्नु डोळायते वा
तर्हीदानीं तदपि सकलं संप्रवक्ष्ये सलिङ्गम् ॥ ६ ॥

प्रोक्तो वासस्तव खलु मया पूर्वमेव प्रियायाः
पश्चाद् ग्राह्यं भवति भवता चारु सन्देशवाक्यम् ।
हन्तेदानीमयि ! तदखिलं मार्गवृत्तं विचित्रं
कृत्याकृत्यावपि च पथि ते वच्मि सम्यक् शृणु त्वम् ॥७॥

आर्यावास(व्यक्तितकुहमा? व्यथितकुहका)दाश्रमादस-
दीयात्
पूर्वा(शं?शां) प्रत्यवहितमनाः साधु गव्यूतिमात्रम् ।
गत्वा तत्र द्विजवर सखे ! भासमानं समन्ताद्
द्रक्ष्यस्यारात् किमपि च पुरं कस्थलीति प्रसिद्धम् ॥८॥

भ्रकुंसानां विपतिकलनां यत्र ही ही प्रकुर्व-
न्नास्ते कश्चिद् वृषलकुलराड् वैश्यवृत्तिं प्रपुष्णन् ।
दृश्या नैव द्विजवर सखे ! संज्ञया चापि कोऽपि
श्रीमान् लोकायतिकमतभाग् वर्जनीयः स एषः(?) ॥९॥

यत्रैवारात् सरस ! सरसी वर्तते कापि रम्या
फुल्लाम्भोजोत्कलितमधुराराव भृङ्गावलीका ।
वेलारूढप्रचुरबकुलाशोकपुन्नागपाळी
नीळोद्भ्राम्यत्पिककुलकळोत्ताळगीताभिरामा(त?) ॥१०॥

य(स्यां? स्याः) तीरे हिमगिरिभुवा साकमाभाति साक्षाद्
वाराणस्याममरतटिनीरोधसीवेन्दुमौलिः ।
ज्योत्स्नावत्यः प्रमदमधुना यत्र तामिस्रपक्षे-
ष्वेणाक्षीणां रतिरसजुषामावहन्ति प्रदोषाः ॥ ११ ॥

केकाघोषोत्कलितलळितग्रीवतुण्डाभिराम-
व्यालीनाङ्गोद्दलितविकसच्चन्द्रकोद्यच्छिखण्डैः ।
गौरीनाथं परमपुरुषं यत्र ते लास्यघोषै-
र्लीलालोलैर्द्विजवर सखे ! भक्तिपूर्वं भजेथाः ॥ १२ ॥

भक्ताभीष्टप्रदमथ पुरारातिमातोष्य चैवं
तद्देश्यानप्युपचितरसैः प्रीणयित्वा विलासैः ।
द्रागेवालङ्कुरु वत ! वियत्युत्पतन्नेतदीयाद्
देवागारात् पुनरपि दिशां पौरुहूतीं क्रमेण ॥ १३ ॥

तावच्छ्रीमंस्तव नयनयोः सम्यगाविर्भविष्य-
त्याशुम्भन्ती गमनसरणिर्नूनमाश्रेणिकान्तम् ।
नीरन्ध्रोल्लासितसुरतरुप्रख्यपार्श्वद्रुमौघ-
च्छायावासोन्मथितगमनायासनानाजनौघा ॥ १४ ॥

नानाभारोद्वहनविनमत्पृष्ठभागोन्नतांस-
ग्रीवाभङ्गाञ्चितघणघणाघोषघण्टानिनादैः ।
गोत्राकारैर्वटुकवटुभिश्चोद्यमानैर्वृषौघै-
रद्याप्येषा सततमयि ते हन्त ! रथ्या विभाति ॥ १५ ॥

प्रेमावेशात् पुळकितसुहृग्बाहुपाशाक्तकण्ठै-
र्हूणाधीशैः सुखतरसमाधिष्ठितैराविशालैः ।
सैषा भाति ह्यपि च शिबिकागाडिहौभादिमुख्यै-
र्नानायानैर्मनुजतुरगोत्तुङ्गमातङ्गवाह्यैः ॥ १६ ॥

यातायाता बहुयुवतयः सन्ति लावण्यपूर्णा
मध्येमार्गं द्रुतगतिवशात् स्रस्तधम्मिल्लनीव्यः ।
सम्यक् केकानिनदमिळितं (हत्य?नृत्य) यासां पुरस्तात्
तासां त्वं तास्तव खलु मिथः साधु भूया(त्?ः) सहा-
(याम्?यः) ॥१७॥

मध्याह्नार्कप्रभवविलसत्तीक्ष्णपादावलीढ-
व्यामोहाध्वश्रमभवबहुक्लेशिनामध्वगानाम् ।
विश्रान्त्यर्थं मरतकशिलानिर्मितैराविशालै-
रग्रागारैर्द्विजवर सखे!(सम्मतो?संयुता)भाति सेयम् ॥१८॥

आतः श्रीमंस्त्वदुपगमने हन्त ! पार्श्वद्रुमौघ-
व्यालीनोद्यत्कुरबकलतानिःसृतैः पुष्पवर्गैः ।
सर्वत्राभात्ययि ! बत सखे ! पौरक(स्नापि?न्यावि)मुक्तै-
राचारार्थं नृपतिगमने लाजवर्षैरिवेयम् ॥ १९ ॥

चित्राकारास्त्वनुपदमहो ! पार्श्वभागेषु यस्याः
स्निग्धच्छायातरुषु विहितास्वञ्चितासु प्रपासु ।
श्रान्ताः पान्थास्त्रिगुणकलितान्यापिबन्तः पयांसि
स्वैराला(पंपा) व्यपगततृषः स्वस्थचित्ता वसन्ति ॥ २० ॥

भूयोऽप्येवं नवनवरसोल्लासितान्यद्भुतानि
ह्येतान्येतान्ययि ! बत ! सखे ! तत्र तत्रागतानि ।
मध्येमार्गं मुहुरपि मुहुः पश्यतो गच्छतस्ते
मार्गायासः क नु खलु भवेदुच्यतां साधुकीर्ते ! ॥ २१ ॥

पुष्पकोडं मरुतपुरमप्यत्र वल्लाप(गंम्बेगाङ्के)
शूरक्को(डाडं) मणियनटमित्यञ्जसैतान् प्रदेशान् ।
पश्चात् कृत्वा पुनरपि सखे ! गच्छतस्ते पुरस्ताद्
(दीद्वी)पीवक्रः स्फुटतरमहो! भासितोऽयं गिरीन्द्रः ॥२२॥

यस्मिन्नीषत्कलितहिमवत्यन्वहं वर्तमानः
केकानादोत्कलितरसवत्ताण्डवः केकिलोकः ।
दृष्ट्वायान्तं प्रमुदितमनाः प्रीतिपूर्वं भवन्तं
प्रत्युद्यायादपि च कृतिनां कुत्र नोत्कर्षलाभः ॥ २३ ॥

नीलो वायं कुलगिरिरिति व्यक्तशङ्कावहस्ते
यो वै शैलः प्रमुदमकरोदीषदालोकनेऽपि ।
सर्वत्रोद्यन्नवनवसुमस्तोममाकन्दवृन्द-
व्यालीनेषच्चलदलिकुलाच्छादिताशावकाशः ॥ २४ ॥

शृङ्गाग्रोद्धट्टनदश(दी?दि)शाकीर्णतारावलीक-
स्यास्य श्रीम(त्?न्!) द्विजवर! सखे! हन्त सर्वत्र राजः।
वीक्षं वीक्षं निरुपमतरोत्तुङ्गतामात्तलज्जः
क्षोणीपृष्ठे निपतति सदा विन्ध्यनामा गिरीन्द्रः ॥२५॥

यच्छृङ्गाग्रे निवसति सदा बाधिताशेषसत्त्वः
साक्षादुच्चैर्विवृतवदनो हन्त! द्वीपीकदम्बः।
मा भैषीस्त्वं ज्वलनकणिकाप्रख्यरूक्षाक्षिकोणा-
नालोक्यैतानयि बत सखे! दूरवर्ज्यास्त एव ॥ २६ ॥

लीलालोलैरलसनयनैरुल्लसद्भिः पतद्भिः
प्रक्रीडद्भिः समुचितरसैः प्रद्रवद्भी रणद्भिः।
एणीशावैर्बहुभिरनिशं तप्तहेमप्रकाशैः
सर्वत्रायं विलसति! सखे काञ्चना(दी?द्री)श्वरो वा ॥२७॥

पादैरेष क्षितिमपि च साहस्रिकैर्द्यां शिरोभि-
(स्तीक्ष्णा?स्तिष्ठन्) व्याप्य प्रियसख! विराडीश्वरः साधु
साक्षात्।
नेत्रस्थाने परिविलसिताहस्करेन्दुर्गिरीन्द्रः
प्रीत्या वन्द्यो भवति भवता हन्त भाग्यं जनानाम् ॥२८॥

भास्वत्यूर्ध्वप्रसृतघृणिगत्युद्यतीन्दौ तथास्तं
याते घण्टाद्वयपरिवहद्वारणेन्द्राचललीलम्।
अध्यासन्ते(?) सुरचलदृशः सेश्वरा यं गिरीन्द्रं
संपश्यन्त्यो युगपरिणतौ सप्तवार्ध्येकभावम् ॥ २९ ॥

प्रत्यक् किञ्चित् क्षितितलमहो! पश्य यस्या विशालं
तालुश्रीरित्ययि बत! महत्सैन्यसंवासयोग्यम् ।
साक्षाद् व्याप्तं वियदिव चिरं नीलजीमूतजालै-
श्छन्नाकारं बलभिदुपलश्यामळैर्नी(प्री?प)जालैः ॥ ३० ॥

यत्रैवासीदयि! (ति?त)लिबलेनाचलाम्भोधिभर्तु-
स्तीव्राघातापतितविशिखोत्कृत्तबाहूरुकण्ठम् ।
मेदोमज्जामिळितगळितोद्रिक्तरक्तप्रवाहं
हाहाकारं तुमुलमतिभीतिप्रदं (स्तः?सं)प्रहारः ॥ ३१ ॥

शस्त्राशस्त्रिप्रहरणगळद्रक्तपूर्णा धरित्री
नृत्यत्कूळीकरतलसमास्फालनव्यक्त(रा? ता)लम् ।
अद्याप्युद्गायति खलु यशः क्ष्माधराम्भोधिभर्तु-
र्यत्रानल्पाञ्चितपिशितभुक्कङ्कगृध्रप्रणादैः ॥ ३२ ॥

हेमाम्भोजप्रकलितमधुस्यन्दिनिष्यन्दवृन्द-
व्यालीनोद्यच्चलदळिकुलालापघोषाभिरामम् ।
य(स्ति?स्मि)स्तीरस्थितसुरतरुप्रख्यनानाद्रुमौघ
च्छायाच्छन्नं किमपि च सरः पूर्णतोयं विभाति ॥ ३३ ॥

हुङ्कारे(ण) द्रुततरमभिप्रेत्य माहाकुलं य-
त्तोयं पीत्वा चर(न्)ति सततं चीर्णशष्पं सुखेन ।
रङ्गायेत(न्नि?द्र)भस(त?म)वतीर्यावनिं नन्दय त्वं
दीयात् ते यचिरतरमहो! सन्ततं मङ्गलानि ॥ ३४ ॥

फुल्लाम्भोजप्रसृमरमरुत्सौरभाक्कृष्टलोके
तीरे यस्य प्रियसख ! सदा स्वैरसंवासयोग्ये ।
तावत्कालं निवसतु भवानुन्मिषत्सिन्दुवारे
यावच्छ्रीमन् चिरमपि भवेद् विश्रमः पीततोयः ॥ ३५ ॥

वि(शित्यै? श्रम्यै)वं पुनरपि यतः शीघ्रगामी भव त्वं
केकाघोषैरुपचितरसैर्घोषिताशावकाशः ।
कोऽयं तिर्यक् चलति गगने तेजसा दुर्निरीक्ष्यः
सर्वैरेवं कुतुकसुलभावेशमुद्वीक्षमाणः ॥ ३६ ॥

यास्यन्नेवं किमपि भगवन् ! प्रागुदक्प्रेरिताक्षो
नेल्लायाख्यं जनपदमहो पश्यसि द्राक् पुरस्तात् ।
कल्याः कुल्या अमरसरिता तुल्यकुल्याः प्रथन्ते
मल्ल्यावल्या स्थगिततटिका याश्च ताभिः परीतम् ॥ ३७ ॥

यत्रायुष्मन्नुपचिततमःपुञ्जबीजायमानं
यत्किञ्चिद् वै कुलमिह नृणां वर्तते हन्त कष्टम् ।
प्रायेणैतद् द्विजवर ! सखे ! कौशवंशायितत्वा-
दाचण्डालद्विजकुलसभानैकचित्तप्रवृत्ति ॥ ३८ ।

उद्वेलोद्यत्पिशितमिळितानल्पमैरेयपाना-
द्व्याघूर्णा(क्ष?क्ष)प्रतिनिशमहो! बाधिताशेषलो(कः?कम्)।
भ्रातः श्रीमन्नपि बत दिवा मुख्यभावेन विज्ञ
मह्यं भाति द्विजवर सखे! हन्त कष्टा दशेयम् ॥ ३९ ॥

मोहावेशव्ययितविहिताचारसेतु स्मरोद्यद्-
ग्राम्यचेतोविनिमयवधूसङ्गसंप्राप्तसौख्यम् ।
स्त्रीपुंसत्वोपचितरतिमत् प्रायशो हन्त कष्टं
तिर्यग्वंशायितमिदमहो मुक्तलज्जं विभाति ॥ ४० ॥

दूरादेतत् परिहर सखे ! सज्जनद्रोहशील
नो चेद् बद्धो हहह ! निहतो हन्त ! मुक्तोऽथवा स्याः ।
मित्रार्थं ते सपदि वियता गच्छतः साधुकीर्ते-
र्लक्ष्मीजानिर्दिशतु सततं मङ्गलं वासुदेवः ॥ ४१ ॥

गच्छन् किञ्चित् पुनरपि यतः प्राग्दिशं हन्त साक्षाद्
गौरीकान्तं परमपुरुषं पश्य लोकैकनाथम् ।
भक्त्या सम्यक् श्रुतिभिरनिशं सेव्यमानं द्विजेन्द्रै-
र्भाग्यं भाग्यं भवतु भवता वन्दनीयः स देवः ॥ ४२ ॥

यत्पादाब्जानमनभजनाराधनोपासनाभिः
पूर्वं सम्यक् सुहृदुपकृतिं कर्तुमीष्टे प(प्लो?यो)दः ।
यक्षोऽपि द्रागहमिव तदाराधनेनाप्तमित्र
स्तस्माच्छ्रीमन्नयि बत सखे ! भक्तिपूर्वं भजेथाः ॥ ४३ ॥

यत्पादाम्भोरुहयुगळसेवाफलेनैव पूर्वं
जम्भारातिः समधिगतवान् सर्वदेवाधिपत्यम् ।
तेनैवाहो सरसिजभवः सृष्टिकर्तृत्वमाप्तः
को वा धन्यो भवति हि सखे ! यत्प्रसादैर्विहीनः ॥४४॥

यत्सेवायामवहितमनाः कश्चिदास्ते यदीये
　क्षेत्रे नित्यं क्षितिसुरवरश्चम्पकश्रेणिसंज्ञः
संप्राप्यैनं प्रणयमधुरं चारुकेकानिनादैः
　प्रीत्या स्वामिन्निति बत सखे! तत्र संभावयेथाः ॥४५॥

तावच्छ्रीमन्नयमुपदिशेद् भूमिदेवोत्तमस्ते
　प्रीत्या सर्वं परमपुरुषाराधनव्यक्तमार्गः ।
भूयो भूयः सपदि विधिवद् भूमिदेवोक्तमार्गे-
　णाराध्यैनं पशुपतिमतः शीघ्रगामी भव त्वम् ॥ ४६ ॥

आभाति द्राक् तदनु सविधे गच्छतस्ते पुरस्ता-
　दासन्नोद्यत्कुसुमितवनं मेषपाषाणकूटम् ।
चेतोरम्यं प्रियसख! समुल्लासितैस्तत्पदाङ्कं
　कौ वा तृप्यत्यनुपदमिदं साधु पश्यन् मयूरम्(?) ॥४७॥

मौञ्जीकृष्णाजिनपरिमिलद्ब्रह्मसूत्राञ्चिताङ्गा
　भारद्वाजाः करधृतसमित्खण्डकुण्डीरदण्डाः ।
सर्वत्रास्मिन् श्रुतिसुखपराः सञ्चरन्ति द्विजेन्द्राः
　केकाभिस्तानुपचर सखे! षड्जसंवादिनीभिः ॥ ४८ ॥

यस्मिन् श्रीमन्नपि च गृहिणः सन्निषण्णाः सशिष्या
　जैमिन्युक्तीरनुदिनमहो पाठयन्तः पठन्तः ।
गच्छन्तं त्वामयि बत सखे! सम्यगातिथ्यतो वै
　सोपाध्यायाः सपदि विधिवत् पूजयेयुः प्रकामम् ॥४९॥

यत्र श्रीमन्! निवसति सखे! योगिवृन्दोऽनु(लेपं?वेलं)
प्राणायामैर्नियमितमरुल्लङ्घिताशेषचक्रः ।
नाडीमार्गोज्ज्वलितदहनाविद्धशीतांशुबिम्ब-
(द्रा?प्र)स्वेदोद्यत्प्रचुरितसुधाप्लावनानन्दितात्मा ॥ ५० ॥

यस्माच्छ्रीमन् जगदिदमसद् भौतिकं प्रागुदेति
प्रातर्यस्मिन्नथ च रमते यस्य भासा विभाति ।
यच्चैतन्यादपि च सततं चेतयत्येव सम्यग्
भूयोऽपि द्रागयि बत सखे! लीयते हन्त यस्मिन् ॥५१॥

सत्तामात्रं निरुपमसुखं शाश्वतं शान्तमेकं
चिद्रूपं तं परमपुरुषं भावयन्तो महान्तः ।
मोहानेतानपि च सुदृढान् मायिकानप्यशेषां-
स्त्यक्त्वा यस्मिन्ननुदिनमहो सर्वतः सञ्चरन्ति ॥ ५२ ॥

मध्येमार्गं पुनरपि यतो गच्छतस्ते पुरस्ता-
दाशाकाशो(त्)सृतकुसुमितानेकशाखोपशाखः ।
उच्चैराभात्ययि बत सखे! शाल्मलिर्नाम वृक्षो
भित्त्वा वार्धिं क्षितिमपि गता बाडवाग्नेः शिखेव ॥ ५३ ॥

लीनानेकद्विजकुलकलालापगीतानुगाय-
न्माद्यद्भृङ्गीपतनसुमनःस्यन्दिमूर्धाभिषिक्तः ।
साक्षा(देषः?देवः)पशुपतिरिति व्यक्तशङ्कावहो वै
भूयाच्छ्रीमन्नभिनवसुमस्तोममूर्धा मुदे वः ॥ ५४ ॥

यच्छृङ्गाग्रादपि खलु भवे भीषणं वारिराशेः
किं वा लोके भवति सुकृतं यत्परं नैव जाने ।
तस्मादेनं द्विजवर सखे ! सम्यगालोकय त्वं
वार्धिं साक्षात् परमपुरुषो यत्र शेते मुरारिः ॥ ५५ ॥

उद्वेलोद्यत्तरलिततरोत्तुङ्गकल्लोलमालं
घोरावर्तभ्रमणभयकृत्फेनिलानन्तपारम् ।
लीनानेकक्षितिधरतदाकारनक्रप्रकाण्डं
निर्घातैक(ह?प्र)तिभटमहाध्वाननिर्घोषिताशम् ॥५६॥

भीमत्वात् काप्यपि बत सखे ! नैव गम्यः कदाचित्
कान्तत्वादप्यथ खलु सदा गम्य एवैष नूनम् ।
नैतच्चित्रं भवति भगवन् ! भीमकान्तत्वहेतू
यादोरत्नान्यनिशमभवन्नन्तरस्थानि यस्मात् ॥ ५७ ॥

सिन्धूरेषस्त(?)रलिततरङ्गाधरं पाययन् सा-
ध्वासां वेगाधरमपि पिबन्नादरात् तुल्यकालम् ।
हा सत्यं यो वहति च मुदानन्यसामान्यरूपं
को वा धीरः सरस अपि यत्तुल्यधर्मा महात्मा ॥५८॥

गोत्रारातेरभिगतभया(द्) वेपमानस्त्रिलोक्यां
लब्ध्वा कश्चिन्न शरणममुं प्राप्य निर्भीतिरास्ते ।
यत्तद् भूयो जनकतनयान्वेषणे वायुसूनो-
र्विश्रान्त्यर्थं प्रभवति पुरा हन्त मैनाक एषः ॥ ५९ ॥

यत्कारुण्यादुरुतरलसद्दिव्यरत्नाश्रितोद्य-
न्नानासम्पत्प्रचयपरिपूर्णैकपोताश्चरन्ति ।
द्वीपाद् द्वीपं ससुखमनिशं हन्त सांयात्रिकौघाः
क्षुब्धश्चेद् द्रागयमयि! चिरं(सङ्कपे?सम्प्लवे)त् सर्वलोकान् ॥

अश्वं चोच्चैःश्रवसममुमैरावतं पारिजातं
पीयूषं वा सुरभिमपि गां प्राप्तवान् प्राङ् महेन्द्रः ।
रत्नान्येतान्यपि च मनुजा वज्रवैडूर्यमुख्या-
न्यद्याप्यस्मादिह खलु सखे! प्राप्नुवन्त्युत्तमानि ॥६१॥

यस्मादेव द्विजवर सखे! प्रादुरासीत् सुधांशुः
साक्षाल्लक्ष्मीरपि च भगवान् हन्त धन्वन्तरिश्च ।
किं वाप्युक्त्वा सकलमपि (खी?य)जातमेवेति मन्ये
किं वा रम्यं महदतिशयं वस्तु येनोन्मितं स्यात् ॥ ६२ ॥

पश्यन्नेवं जलधिमग(यी?म)स्याग्र एव स्थितं द्राक्
प्राचीमाशां कलय नयने किञ्चिदुत्कन्धरः सन् ।
तावद् द्रक्ष्यस्यमरनगरीतुल्यकुल्यां पुरीं तां
या वा श्रीमन् द्विजवर सखे! श्रे(यि?णि)केत्युक्तपूर्वा ॥

यत्र श्रीमन्नयि बत सखे! पण्यवीथीष्वजस्रं
विश्राम्य(न्ते?न्ति) क्वचन विविधाः क्रेतृविक्रेतृसङ्घाः ।
नानारत्नोज्ज्वलितकनकाकल्पदिव्यांशुकोद्य-
ज्जातीपुष्पाजिनहिमकरानल्पकुप्यादिकानाम् ॥ ६४ ॥

यत्र क्वापि द्विजवर सखे ! मन्दुरासु प्रकामं
हेषाघोषाः प्रतिदिनमहो वाजिनामुल्लसन्ति ।
हीत्काराश्च क्वचन सततं दन्तिनामुन्मदाना-
मालानेषु प्रतिवनमयःशृङ्खलाबन्धितानाम् ॥ ६५ ॥

यत्र क्वापि प्रचुरतरमावेशनेषु प्रकामं
योषिद्रूपा रचितमृदुमृत्पुत्रिकाः सञ्चरन्ति ।
साक्षाद्बुद्ध्या सुदृश इति ताः प्रेक्ष्य सम्यग् युवान-
श्चित्रं चित्रं रमितुमनिशं प्राक्रमन्त्यात्तरागाः ॥ ६६ ॥

यत्र श्रीमन् क्वचिदपि सदा यन्त्रमार्गेषु सम्यङ्-
निश्च्योतन्ते प्रियसख ! सुधासन्निभा वारिधाराः ।
खेलन्त्येतास्वपि खलु सखे ! कामिनः कामिनीभिः
प्रोद्वेलानङ्गकरणपरिम्लानवक्त्राम्बुजाभिः ॥ ६७ ॥

चित्राकल्पोल्लसितवपुषामुल्लसद्विभ्रमाणां
नाट्योद्घोषः क्वचिदपि भवत्यन्वहं लासिकानाम् ।
वीणावेणूद्भवकळकळोदात्ततानप्रता(ना?नं)
व्यक्तोद्घातस्वरितमुखरं चारु गीतानुरूपम् ॥६८ ॥

भेरीशङ्खप्रतिभटमहत्काकळीकाळढक्का-
दुन्दु(भ्यो?भ्यु)द्यन्ननुपमितनिध्वानघोषाः समन्तात् ।
यत्र क्वापि द्विजवर सखे ! पूरयन्तो दिगन्ता-
नुद्घुष्यन्ति प्रतिदिनमहो मेघनिध्वानकल्पाः ॥ ६९ ॥

देवागारं क्वचिदपि भवत्यद्भुताकारमेकं
भ्रातर्यत्र द्विजवर सखे ! हन्त केदारकल्पम् ।
श्रीमन् यत्र श्रुतिभिरनिशं सेव्यमानो महीन्द्रै-
र्भूतेशोऽयं पशुपतिसुतः साधु साक्षाद् विभाति ॥ ७० ॥

आवृत्याहो हरजवसतिं सन्ति बह्व्यो हि नार्यः
पीनोत्तुङ्गस्तनभरनमन्मध्यमाः ग्रातिकर्ण्यः(?) ।
वेधाः पूर्वं जलनिधिसुतानिर्मितिप्राप्तमेताः
सृष्ट्वासीनं घुणकृतलिपिप्रख्यवाच्यं ममार्ज ॥ ७१ ॥

तासां मध्ये तटिदिव परं दृश्यते कापि बाला
हेलालोलाकलितविलसच्चारुलीलावलोका ।
शृङ्गाराब्धिप्रसृमरमरुत्सौरभाकृष्टसाध्वी-
(मा)स्वाद्योद्यत्स्मररसविकारैकमूर्तेव साक्षात् ॥ ७२ ॥

आयान्तीं तां पशुपतिसुताराधनार्थं स(वे?खे)लं
वीक्षं वीक्षं विवदति जनः केयमित्यद्भुतेन ।
गत्या हंसी ललितवचनैः शारिका चारु गीत्या
सत्यं सत्यं परभृतसुता विभ्रमैरेणशावा ॥ ७३ ॥

धन्यः को वा मनसिजरसास्वादने मत्समानः
कष्टं कष्टं किमिह करवाण्युत्सृजाम्येव सर्वान् ।
मृद्रूपेभ्यो वरमिह परेभ्यो हि वैधव्यमेवे-
त्येषा बाला भवति सततं चात्मना केवलैव ॥ ७४ ॥

एवम्भूता सुललिततनुः केवलाप्यद्वितीया-
प्येषा नि(न्थ?त्यं) प्रतिसममदृष्टानुभावात् प्रसूते ।
नैतच्चित्रं भवति दयया किं न साध्यं जनाना-
मित्येवाह श्रुतिरिह(भ?द)याशालिनी सा हि बाला ॥

अन्या काचित् कमलनयना वर्तते कोमलाङ्गी
धिक्कुर्वन्ती सकलसुदृशः सौकुमार्यप्रसङ्गे ।
नैतत् कष्टं कुवलयदृशां सङ्कशो हेलने यत्
साक्षादेषा किल बत सखे ! मातुलानी हि यस्याः(?) ॥

अन्या काचित् किल निजयशःपूरिताशेषलोका
भूतेशानुग्रहसुखतरावाप्तसत्पुत्रिकास्ते ।
यत्प्राप्तानङ्गिकविधिनिषेधादिवैदग्ध्यरीत्यः
सर्वा नार्यः प्रियसख ! भवन्त्यन्यथा नैव दृष्टाः ॥७७॥

अन्या काचित् सरसिजमुखी वर्तते चारुशीला
यत्रत्यानां सुकृतपरिपाकैकमूर्तेव साक्षात् ।
यो यो(यन्ति?याति) प्रमथपतिसेवार्थमभ्यागतः सन्
तच्चेतोहरणकरणे दीक्षितेवावभाति ॥ ७८ ॥

अन्या काचिन्मृदुलहृदया कल्पवल्ली वधूनां
क्षेत्रे यस्मिन् प्रियसख ! सदा पूर्वभागे वसन्ती ।
भूतेशाराधनकुतुकिनां दूरदेशागतानां
विश्रान्त्यर्थं प्रभवति यतः किं परं भूरि पुण्यम् ॥ ७९ ॥

अन्या काचित् तरळनयना वर्तते चारुवाणी
क्षेत्रे यस्मिन् द्विजवर सखे! दक्षिणोपान्तदेशे ।
सैषा नित्यं करधृतलसद्दीपिकानुप्रयाणे-
नाकर्षन्ती युव(ति?)जनमनःकौतुकं कौतुकाङ्गी ॥ ८० ॥

अन्या काचिन्मुकुळितमुखी निस्तुलाकारशीला
प्रत्यग्भागे कृतनिलयना वर्तते यत्र नित्यम् ।
दैवेनैनामनुसरति का भूतनाथस्तु साक्षा-
दस्यै प्रादा(नि?न्नि)जमपि मुदा हन्त पूर्वार्धभागम् ॥८१॥

अन्या काचित् कुटिलहृदया ह्युत्तरेणैव देवा-
गारं साक्षाद् वसति च जरारूपिणी कृत्तिकेव ।
मा मा पश्य द्विजवर सखे! हन्त तां क्रूरचेष्टां
सैषा सर्वान् दहति न चिराद् दृष्टिपातो(न्मुखे?ल्मुकेन) ॥

एतासां याः कुलयुवतयः पुंश्चलीत्वं वधूना-
मीषत्कर्तुं समनुमिळिताः सर्वतः सञ्चरन्ति ।
ता एवैताः परिणतशरच्चन्द्रबिम्बाननास्ते
कल्याणाय प्रियसख! चिरं दृष्टमात्र भवेयुः ॥ ८३ ॥

विश्राम्य(न्ते?न्ति) क्षितिसुरवरा मोदकाप्त्यर्थमन्तः
क्षेत्रे यस्मिन् क्षुदुपशमने विस्मृतान्योन्यमैत्राः ।
लब्ध्वा भूयः क्षुदुपशमने हन्त! शान्ता नमन्तो
भूताधीशं त्रिभुवनगुरुं स्व(स्वै?स्थ)चित्ताः प्रयान्ति ॥८४॥

साक्षादस्मात् त्रिभुवनगुरोरीश्वराद् भूतभर्तु-
र्लब्धाशीश्चेत्प्रियसख ! भवेः सिद्धसाध्यो न चेन्न ।
तस्मादेनं परमपुरुषं मङ्क्षु सन्तोषय त्वं
चेतोवाक्कायिकभजनसंकीर्तनाराधनाभिः ॥ ८५ ॥

यत्र प्राच्यां दिशि बत किमप्याश्रमं भाति साक्षा-
न्नानापुष्पाकलिततुळसीपुण्यगन्धाढ्यभारात् ।
यस्मिन्नास्ते क्षितिसुरवरः श्रीनिवासो महात्मा
सोऽयं साक्षाद्धरिरिव स(भा?दा) वन्दनीयस्तपस्वी ॥८६॥

गोभिर्व्याघ्रा भुजगततिभिः श्येनसङ्घास्तथान्ये
सर्वे सत्त्वाः प्रियसख ! मिथो वैरिणश्चापि यत्र ।
यन्माहात्म्यादपहृतशुचस्त्यक्तवैराश्च मित्राः
सङ्घीभूय द्विजवर ! मिथः स्वैरकल्पं चरन्ति ॥ ८७ ॥

यस्यालोके विघटिततमश्चित्तमुद्भासयेद् द्राक्
सूर्यालोके विकसति यथा पुण्डरीकं तथैव ।
तस्मादेनं क्षितिसुरवरं सम्यगालोकय त्वं
को वा भव्यो भवति हि सखे ! चित्तशुद्ध्या विहीनः ॥

यस्यो(दक्सति?दीच्या)वधिमथ समाश्रित्य विभ्राजमानं
हर्म्याग्राचुम्बितशशिकलामुद्रितोद्यत्पताकम् ।
किञ्चिद् गेहं बहुसुरपुरं द्रक्ष्यसि द्राक् त्वदक्ष्णोः
पुण्यं साक्षादिव कलयितुं निर्मितं वै विधात्रा ॥ ८९ ॥

द्वारोपान्तध्वजपटभवद्व्याघ्रिकाकारशुम्भ-
न्मुद्राविद्रावितशशधराङ्कासितैणीकिशोकम् ।
नानापुष्पाक्षतदधिमिळल्लाजदूर्वावकीर्ण-
द्वारोद्देशं स्फटिकविलसच्चारुसोपानमार्गम् ॥ ९० ॥

अश्रान्तास्वादितमधुरसोद्भ्रान्तगुञ्जद्द्विरेफ-
व्याकीर्णोद्यत्कुसुमितलताशोभितोद्यानरम्यम् ।
धारायन्त्रप्रसरितसुधासन्निभाम्भःप्रपूर्णं
वापीकूपादिषु च सततं चिन्तमध्याङ्कणेऽपि(?) ॥ ९१ ॥

सौवर्णोद्यत्प्रकलितमणिस्तम्भविभ्राजमानं
वैडूर्योद्यन्मरतकमिलत्स्फाटिकालिन्ददेशम् ।
नानारत्नाञ्चितकमलसच्चारुवातायनौघं
वज्राश्माकल्पितवळभिकेन्द्राश्मकुड्यप्रकाण्डम् ॥ ९२ ॥

चित्राकल्पारचितसुवितानाञ्चितान्तःपुरोद्य-
त्खट्वातल्पान्तिकपरिलसद्दीपदेदीप्यमानम् ।
सर्वत्रोद्धूपितमगरुभिर्गुग्गुलूसारमिश्रं
तल्पोपान्तप्रणिहितपयःपूर्णभृङ्गारकौघम् ॥ ९३ ॥

क्षोणीन्द्राश्राविततमम(हत्?हा)पुण्यगाथावघुष्टं
गोष्ठे घुष्यत्सुरभिमणिनादाञ्चितं भव्यभूतम् ।
श्रीमन्नारायणभवशिवेत्यालपच्छारिकौघं
शिल्पाकल्पेक्षणसमुदितानेकशि(लिप?ल्प)प्रकाण्डम् ॥

अश्रान्तोद्भावितकलकलोदात्ततानप्रताने-
वीणानादैरुपचितमनःप्रीतिमद्वैणिकौघम् ।
स्वैरालापं क्वचिदत इतः संचरत्कामिनीकं
केकोद्घोषं त्वदभिगमनानन्द(द्यद्य?नृत्य)न्मयूरम् ॥

कौबेरं वा वरगृहमिदं हन्त ! पौरन्दरं वे-
त्यन्योन्योक्त्या विवदितजनं सर्वसम्पत्समृद्धम् ।
अभ्यर्णस्थाशुभरवमिलत्क्रोधरूपैकरण्डं
यत्तद्युक्तं कुमनुभजतां दृष्टिदोषापहत्यै ॥ ९६ ॥

यस्मिन्नेव द्विजवर सखे हन्त ! सेयं कृशाङ्गी
शृङ्गाराब्धिप्रभवलतिकातन्तुसारेव भाति ।
या वा सम्यङ् मम हृदि सदा वज्रलेपेव लीना
मैत्रं यत्तद्भवतु सकलं सुष्मते मय्यमुष्याम्(?) ॥९७॥

ब्रह्मण्येयं सरसिजमुखी वासुदेवैकभक्ता
शुश्रूषन्ती निजगुरुजनं प्रीणयन्ती च बन्धून् ।
जीवेशं मां मदनविधिना सम्यगानन्दयन्ती
त्यक्ष्यन्ती द्रागशुभसरणिं स्वाचरन्ती स्वधर्मान् ॥९८॥

आलीनाकुञ्चितघनगळत्केशभारानताङ्गी
व्रीळाकु(ता?ष्टा)ञ्चितपरिचलद्भ्रूविलासायताक्षी ।
प्रेमाभोगा स्मितरससुधापूर्णवक्त्रारविन्दा
पीनोत्तुङ्गस्तनभरनमन्मध्यमा चारुगात्री ॥ ९९ ॥

दैत्यादित्योन्मथितकलशाम्भोधिमध्यात् प्रजातं
पीयूषं तन्मथनजनितं यच्च माधुर्यसारम् ।
तत्सूक्ष्माङ्गैरिव खलु मम प्राणसंरक्षणार्थं
बालामेनामसृजदिव तां चित्तजन्मैकशिल्पी ॥ १०० ॥

इन्द्राणीयं नहि खलु रमा नैव वाणी न गौरी
नैव ज्योत्स्ना न च खलु तडिद्वल्लरीति प्रकामम् ।
... ... मन्यमाना-
मे(षा?ता)मीषच्चलितनयनां विस्मरेयं कथं वा ॥ १०१ ॥

सालङ्काराः सुललितपदाश्चारुरूपाः सुवृत्ता-
श्चेतोरम्याः सरसमधुराश्चापि गम्भीरभावाः ।
यत्रत्या(स्ते?स्ताः) कुवलयदृशो यद्गिरश्चानुयान्त्य(ः)
साक्षादर्थं कविजनवचांसीव तां दर्शयेयुः ॥ १०२ ॥

हन्तेदानीं ह(र?त)विधिवशा(द्) दूरसंस्थे मयीयं
तन्वी बाला प्रतिप(द?दु)दिता चन्द्रलेखेव भाति ।
शोकावेगादपि बत तवालोकने तु प्रकामं
प्रायेणैवं भवितुमनया शक्यमेवेति शङ्के ॥ १०३ ॥

पृच्छन्ती वा किमु सहचरीं मन्दमन्दं सलज्जं
भूतेशं वा परमपुरुषं प्रार्थयन्ती निकामम् ।
ध्यायन्ती वा मदभिगमनं द्वारमासाद्य गूढं
पश्यन्ती वा सततमिति वा वर्तते सा कृशाङ्गी ॥ १०४ ॥

रत्नादर्शे मुहुरपि मुहुर्वीक्ष्य वक्त्रं स्वकीयं
स्मारं स्मारं मम च वदनं निःश्वसन्ती (स?सु)दीर्घम् ।
गायन्ती वा विरहपदिकां मन्दमातोद्य वीणा-
मश्रूण्यक्ष्णोर्मुहुरपि मरीमृज्यमानांशुकेन ॥ १०५ ॥

मात्रा पित्रा ह्यपि च सुहृदा पुत्रि! कस्माद्यद(त्वं?र्थं)
कष्टं कष्टं प्रतिदिनमिदं म्लायते ते मुखाब्जम् ।
इत्यु(क्ता?क्त्वा) सा कृशतनुरहो मीलिताक्षी मृगाक्षी
किं वा वक्ष्ये गुरुजनमिति व्याकुला वा समास्ते ॥१०६॥

किं वा पुण्यं महदिह कृतं यत् त्वमासी(द?र)शोकः
किं नो वक्ष्यस्यद इह भवत्तुल्यतां यानि नाम्ना ।
कारुण्योक्त्या सततमिति वा प्रार्थयन्ती नमन्ती
शोकावेगादधिकविवशा हन्त! कङ्केलिमूले ॥ १०७ ॥

देहे वा किं मनसि यदि वा हंसि मामस्त्रजालै-
र्द्वेधा चेदध्ययि तदखिलं निष्फलं स्यात् कुबुद्धे ! ।
प्रागेवाहो! विरहदहनप्लुष्टमेतच्छरीरं
चेतस्तस्मिन् निहितमिति वा मन्मथं भर्त्सयन्ती ॥१०८॥

सत्यं ब्रूहि क्व नु मम गतः प्राणदाता पयोद-
स्तृष्णेयं मां हहह! सततं बाधते दुर्निवारा ।
इत्येवं त्वां सकरुणमहो पृच्छतीयं चकोरी
किं न श्रोष्यस्ययि बत! सखीत्यालपन्ती वयस्याम् ॥१०९॥

बुद्ध्युन्मेषो भवति हि नृणां कार्यजाते त्वतीते
किं वा कुर्मः करगतगता सा कुहूर्हन्त कष्टम् ।
आयाता चेत् तदनु निगळेनाशु बद्ध्वा निरुन्ध्यां
किं वा कुर्याः पुनरिह शठेत्याक्षिपन्ती सुधांशुम् ॥ ११० ॥

पश्यस्वेकाममृतलतिकामप्रणोद्यत्प्रवाळां
भृङ्गास्पृष्टोज्ज्वलितकलिकामाश्रयद्रुप्रहीणाम् ।
इत्यन्योन्यं प्रवदति सखीलोक एषा सबाष्पं
दिष्ट्येत्यर्धं कथमपि मनागुद्गिरन्ती न वा स्यात् ॥१११॥

चित्ताम्भोजे तव खलु वसाम्येक एवास्मदीये
यूयं नैवेत्यधिगतरुषेवेह नायासि नाथ! ।
किं वा वोढुं निजजनकृतं पापमेकं न शक्यं
भर्त्रेत्येवं चटुलवचनै लुप्यतीवासमादा(?) ॥ ११२ ॥

पुष्टिस्तुष्टिः प्रतिदिनमहो दृश्यते त्वय्यकस्मात्
किं तद् बाले प्रियसखि! वदेत्याळिभिर्हास्यमाना ।
वीक्षन्ती तास्तरळनयना साभ्यसूयं सलज्जं
स्मृत्वा दैन्यं निजमधिगता हन्त चिन्तां दुरन्ताम् ॥११३॥

ये वै शीतद्युतिरिति वदन्त्युल्मुकांशुं मृगाङ्कं
ते वै धूर्ता अपि खलु जगद्वञ्चकाः सन्ति यस्मात् ।
हन्तैतस्मिन्नुदयति चिरं दह्यते मे शरीरं
हा हेत्येवं बहुतरशुचा तप्यते वानुवेलम् ॥ ११४ ॥

आरूढैषा कमपि सुभगं मालती चूतपोतं
किं नो दृष्टं वदत पुरतश्चैव वैचित्र्यमस्याः ।
इत्यन्योन्योदितनिजसखीसंकुलं वीक्ष्य सेयं
हा हा कष्टं स्फुरितहृदया वर्तते वा समौनम् ॥११५॥

बालामेनामिह कुमुदिनीं निर्घृणः शीतभानु-
स्त्यक्त्वा यातः क्व नु तदुचितं यच्च सोऽयं कलङ्की ।
तारानाथो ह्ययमिति ययालोचितं प्राङ् न यस्मा-
दीदृग्दुःखे निपतति च सेत्येकदा विव्यथे वा ॥११६॥

यत्सङ्गे यां परिहरति या प्रागिदानीं तु तावद्
द्रष्टुं तं तामनुसरति सा नेयमेनामुपैति ॥
एतद्रीत्या निवसति हि या हन्त ! तां किं न पश्य-
स्येनां बालामकरुण शठेत्यन्वहं वा रुदन्ती ॥ ११७ ॥

इत्थं तावत् प्रियसख ! भवेद् वर्तमाना कृशाङ्गी
सेयं यावत्तव नयनयोर्भाति विद्युल्लतेव ।
तावच्छ्रीमन्नतिमधुरया केकयैवं वद त्वं
भव्यं पश्चाद्रहसि तदिदं चापि सन्देशवाक्यम् ॥११८॥

यो वा धन्यस्तव खलु(यीव)र(स्ती?स्त्व)द्वियोगात्रखिन्नः
साक्षादीहापुरमनु निळातीरमास्ते तपस्यन् ।
भाग्यं भाग्यं भवतु न चिरात् स्वस्ति वामस्तु पुण्यं
तत्सन्देशं शृणु मम मुखान्नीलकण्ठोऽस्मि सत्यम् ॥

एकैकं त्वं सुमुखि ! गणय प्रत्यहं नामवर्णा-
नस्माकं तत् परिणतिरहो यावदायाति तावत् ।
आयास्ये द्राक् तव चरणयोरन्ति(सामयिदस्त्वंकिं मानिनि त्वां)
नैतन्मिथ्या मदनचरणेनैव सत्यं शपेऽहम् ॥ १२० ॥

कच्चिद् भद्रे स्मरसि तदिदं प्रेयसि प्राणनाथे
वातागारे क्वचन वसतोरेकदा नौ सुखेन ।
पुष्पोद्भेदात्तव निशि पृथक् तल्पमासेदुषो मे
मिथ्यासंश्रावितरतरवे सत्यबुद्ध्या कृतं यत् ॥ १२१ ॥

कच्चिद् भद्रे स्मरसि तदिदं प्रेयसि प्राणनाथे !
कण्ठग्राहं चरणकमलेनैकदा मां गृहीत्वा ।
हा हा पैपीलिकभवमिदं पश्य दुःखं कृतघ्ने-
त्यन्तर्हासं यदनुचरितं हन्त पुण्यैकलभ्यम् ॥ १२२ ॥

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
प्रेमालोकामृतरसझरीपूरणैः प्लावयेत त्वाम् ।
ब्रूयादेवं पुनरलसदृग् बाष्पकण्ठं सलज्जं
भ्रातः श्रीमन् सुचिरमयि भो ! जीव जीवेति सास्रम् ॥

यो वा धन्यस्तव च मम च प्रेमभाक् पुण्यशाली
तस्मा एतद्वितरतु भवानित्थमुक्त्वा निगूढम् ।
विश्वासार्थं स्वकरलिखितं भद्रमुद्राङ्कितं ते
हस्ते दीयाद् रहसि कमपि द्रागभिज्ञानपत्रम् ॥ १२४ ॥

आदाय द्राङ् निधिवदधुना भावगर्भं तदेतत्
तत्सन्दिष्टं लिखितमयि भोः ! सम्यगाश्वास्य चैनाम् ।
आगच्छास्मानहमनु निळामीहितार्थप्रदां तां
देवीमीहाभिधनिलयनां भक्तिपूर्वं भजामि ॥ १२५ ॥

इत्थं कश्चित् कमपि पतगं नीलकण्ठाख्यमारा-
दासाद्य प्राक् शरणमचिरादाप्तभारः किलासीत् ।
येषां तावद् भवति शरणं नीलकण्ठस्तु साक्षात्
तेषां पुण्यग्रथितजनुषामत्र किं दुर्लभं स्यात् ॥ १२६ ॥

षड्विंशदुत्तरशतं (?) बत नीलकण्ठ-
सन्देशमेतदतिचारुमृदु प्रबन्धम् ।
यो वा पठेदपि शृणोति स भुक्तभोगः
साक्षाज्जनार्दनपदं प्रतियाति सत्यम् ॥ १२७ ॥

नीलकण्ठसन्देशः समाप्तः ।

श्लोकानुक्रमणी ।

श्लोकाः	श्लोकसंख्याः	श्लोकाः	श्लोकसंख्याः
अन्या काचित् कमल	७६	इत्थं कश्चित्	१२६
अन्या काचित् किल	७७	इत्थं तावत्	११८
अन्या काचित् कुटिल	८२	इत्याख्याते	१२३
अन्या काचित् तरळ	८०	इन्द्राणीयं	१०१
अन्या काचित् सरसिज	७८	उद्वेलोद्यत्तरलित	५६
अन्या काचिन्मुकुलित	८१	उद्वेलोद्यत्पिशित	३९
अन्या काचिन्मृदुल	७९	एकैकं त्वं	१२०
अभ्यायान्तं तटिदिव	२	एतासां याः	८३
अश्रान्तास्वादित	९१	एवंभूता सुललित	७५
अश्रान्तोद्भावित	९५	कच्चिद् भद्रे	१२१
अश्वं चोच्चैःश्रवसम्	६१	कच्चिद् भद्रे	१२२
आदाय द्राङ् निधि	१२५	कश्चित्कान्ताविरह	१
आदाय द्राङ् निरुपम	५	किं वा पुण्यं	१०७
आभाति द्राक्	४७	केकाघोषोत्कलित	१२
आयान्तीं तां	७३	केयं बाला	६
आरुढैषा	११५	कौबेरं वा वर	९६
आर्यावास	८	क्षोणीन्द्राश्राविततम	९४
आलीनाकुञ्चित	२९	गच्छन् किञ्चित्	४२
आवृत्याहो	७१	गोत्रारातेरभिगत	५९
आस्ते काचित्	४	गोभिर्व्याघ्रा	८७

श्लोकाः	श्लोकासंख्याः	श्लोकाः	श्लोकसंख्याः
चित्ताम्भोजे तव	११२	बालामेनामिह	११६
चित्राकल्पाराचित	९३	बुद्ध्युन्मेषो भवति हि	११०
चित्राकल्पोल्लसित	६८	ब्रह्मण्येयं सरसिज	९८
चित्राकारास्त्वनुपद	२०	भक्ताभीष्टप्रदमथ	१३
तावच्छ्रीमंस्तत्र नयनयो	१४	भास्वत्यूर्ध्वप्रसृत	१९
तावच्छ्रीमन्नयमुप	४६	भीमत्वात् क्वाप्ययि बत	५७
तासां मध्ये	७२	भूयोऽप्येवं नवनवरसो	२१
दूरादेतत् परिहर	४१	भेरीशङ्खप्रतिभटमहत्	६९
देवागारं क्वचिदपि	७०	भ्रातः श्रीमंस्त्वदुपगमने	१९
देहे वा किं मनसि	१०८	भ्रातः श्रीमन् प्रियसख!	३
दैत्यादित्योन्मथित	१००	भ्रूकुंसानां विपतिकलनां	९
द्वारोपान्तध्वज	९०	मध्याह्नार्कप्रभव	१८
धन्यः को वा	७४	मध्येमार्गं पुनरपि	५३
नानाभारोद्वहन	१५	मात्रा पित्रा ह्यपि च	१०६
नीलो वायं	२४	मोहावेशव्ययित	४०
पश्यन्नेवं	६३	मौञ्जीकृष्णाजिनपरिमिलत्	४८
पश्यस्येकाममृत	१११	यत्कारुण्यादुरुतरलसद्	६०
पुष्टिस्तुष्टिः प्रतिदिन	११३	यच्छृङ्गाग्रादयि खलु भवे	५५
पुष्पक्रोडं महतपुरमप्यत्र	२२	यच्छृङ्गाग्रे निवसति सदा	२६
पादैरेष क्षितिमपि	२८	यत्पादाब्जानमनभजना	४३
पृच्छन्ती वा किमु	१०४	यत्पादाम्भोरुह	४४
प्रत्यक् किञ्चित्	३०	यत्र क्वापि द्विजवर!	६५
प्रेमावेशात्पुलकित	१६	यत्र क्वापि प्रचुरतर	६६
प्रोक्तो वासस्तत्र	७	यत्र प्राच्यां दिशि	८६
फुल्लाम्भोजप्रसृमर	३५	यत्र श्रीमन् क्वचिदपि	६७

श्लोकाः	श्लोकसंख्याः	श्लोकाः	श्लोकसंख्याः
यत्र श्रीमन्नयि	६४	यो वा धन्यस्तव च	१२४
यत्र श्रीमन्निवसति	५०	रत्नादर्शे मुहुरपि	१०५
यत्रायुष्मन्नुपचिततमः	३८	लीनानेकद्विजकुल	५४
यत्रैवारात् सरस! सरसी	१०	लीलालोलैरलसनयनैः	२७
यत्रैवासीदयि!	३१	विश्राम्यन्ति क्षिति	८४
यत्सङ्गे यां परिहरति या	११७	विश्राम्यैवं पुनरपि	३६
यत्सेवायामवहितमनाः	४५	शस्त्राशस्त्रिप्रहरण	३२
यस्माच्छ्रीमन् जगदिदमसत्	५१	शृङ्गाग्रोद्घट्टन	२५
यस्मादेव द्विजवर	६२	षड्विंशदुत्तरशतं	१२७
यस्मिन्नीषत्कलित	२३	सत्तामात्रं निरुपम	५२
यस्मिन्नेव द्विजवर	९७	सत्यं ब्रूहि	१०९
यस्मिन् श्रीमन्नपि च	४९	साक्षादस्मात्	८५
यस्यास्तीरे हिमगिरि	११	सालङ्कारा	१०२
यस्यालोके विघटित	८८	सिन्धूरेषत्तरलित	५८
यस्योदीच्यावधि	८९	सौवर्णोद्यत्प्रकलितमणि	९२
यातायाता बहुयुवतयः	१७	हन्तेदानीं	१०३
यास्यन्नेवं क्किमपि भगवन्	३७	हुङ्कारेण द्रुततर	३४
ये वै शीतद्युतिरिति	११४	हेमाम्भोजप्रकलित	३३
यो वा धन्यस्तव खलु	११९		